The Kashmir Series Of Texts & Studies.

No. LXXVII.

PARAMARATHACHARCHA
OF
ABHINAVAGUPTA

———0:0———

With Vivarana by

Pt. Hara Bhatta Shastri

Edited by
Pandit Jagaddhar Zadoo, M.A., M.O.L., Shastri
Superintendent Research, Museum and
Archaeological Department,
His Highness' Govt.
J & K. Srinagar.

———:-:———

Published under the authority of the Government of
His Highness Rajarajeshwara Maharajadhiraj
Sri Maharaja Harisinghji Bahadur
G.C.S.I., G.C.I.E., K.C.V.O; LL.D.
Maharaja of Jammu & Kashmir.

Printed at
The Krishna Printing Press.
Kothi Bagh Srinagar,
Kashmir.

A.D. 1947

SAN
294.5
GUP

Indira Gandhi National
Centre for the Arts

कश्मीरसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७७

महामाहेश्वरश्रीअभिनवगुप्ताचार्यरचिता

परमार्थचर्चा

पं० हरभट्टशास्त्रिकृत विवरणोपेता ।

———[o]———

श्रीराजराजेश्वर – महाराजाधिराज – कश्मीरनरेन्द्र

श्रीहरिसिंहजीबहादुराज्ञया

रिसर्च-कार्यालयाध्यक्ष-पण्डितजगद्धरजाडूशास्त्री

एम.ए.,एम.ओ.एल., इत्येतैः

कार्यालयस्थेतरसंपादकपण्डितसहायेन

संशोधनादिसंस्करणोत्तरं

संपाद्य

कृष्णा-प्रिंटिंग प्रेस श्रीनगरे इति मुद्रणालये मुद्रापयित्वा

प्राकाश्यमुपनीता

———[o]———

श्रीनगर – कश्मीर.

संवत् २००४ खैस्ताब्दः १९४७

(अस्य ग्रन्थस्य मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

श्रीपरमार्थचर्चा

विवरणोपेता ।



अभिनवरूपा शक्तिस्तद्गुप्तो यो महेश्वरो देवः ।
तदुभययामलरूपमभिनवगुप्तं शिवं वन्दे

इह खलु वन्द्याभिधानः श्रीमदाचार्याभिनवगुप्तप्रभृतीव्रशक्तिपातपवित्रितहृदयानां जनानां हृत्सु त्रिकशास्त्ररहस्यार्थसंग्रदायं संचिक्रामयिषुः शाम्भवोपायक्रमगर्भिण्या परमार्थचर्याख्यया सप्तश्लोक्या परभैरवसमावेशमुन्मीलयन् परमार्थचर्चां विरचयामास । तत्र संविद्धन एक एव चिदब्धिः परमेश्वरोऽन्तर्बहिः पारिपूर्ण्येण समुच्छलत्तत्तदनन्तविश्वलहरीनिर्भरः पूर्णाहंविमर्शमयचिच्चमत्कारशालिनि स्वमहिम्न्येवावस्थितः, न ततो मनागपि सङ्कोचकलना भिन्नवेद्यवेदकाद्यात्मा त्रैकालिकी बाह्यत्वेन समुदेतीति । अथच स एवानन्दघनतया समुच्छलत्स्वभावः स्वेच्छयैव स्वस्मादेव निरुपादानसहकारिकारणादिसंभारं

विश्वक्रीडामुद्भिभासयिष्यन् स्वस्वातन्त्र्येण शुद्धाशुद्धविमिश्ररूपाणि परस्परापोहनेनावभासमानानि मातृमेयादीनि तत्सम्बन्धांश्च कार्यकारणभाववैचित्र्यादीन् दर्पणप्रतिबिम्बवदनतिरिक्तानप्यतिरिक्ततया निर्भासयति स्वात्मन्येव देशकालाद्युपहितान् । निर्भासितानां च तेषां कालाद्यकलितः स एव पारमार्थिकस्वभाव इति वस्तुतो न किञ्चित् सृज्यते स्थाप्यते संह्रियते वेति । आनन्दघनश्चिदाकाश एव पूर्णपूर्णतरस्तथातथापूर्णमानश्चकास्तीति षडर्धशास्त्रसंप्रदायः । अत्रैव वादिनो विब्रुवते, कथं चिदात्मा महेश्वरोऽन्तःस्थितं भावजातं स्वात्मनः सकाशात् स्वेच्छया बाह्यत्वेनाभासयन् बहिर्भूतमपि स्वात्मन्येव भासयेत् तथाभासमानानामपि भावानां कथं स एवात्मा इत्येतत्सर्वं विप्रतिषिद्धमालक्ष्यते इति एवं शङ्कमानानां प्रतिपत्तिणां शङ्कां निरसितुं परमार्थश्चर्च्यते ॥

तत्र चिदात्मनि महेश्वरे सर्वोऽयं लोकव्यवहारो विश्रान्त इत्येतावत्कथं प्रत्येयतामियादित्याशंक्याह—

अर्केन्दुदीपाद्यवभासभिन्नं
नाभात्यतिव्याप्ततया ततश्च ।
प्रकाशरूपं तदियत्प्रकाश्य
प्रकाशतोख्या व्यवहार एव ॥१॥

इह तावद्घटादिरर्थः संविदो भिन्नत्वेन प्रकाशयितुं न शक्नुयात् संविदात्मत्वे तथा सोऽवभासेत । यद्यर्था—

नामर्थरूत्वमेव प्रघाशमानत्वं नान्यत् तद्व्यतिरिक्तं तजज्ञा नोदयात्प्रागिव ज्ञानोदयेऽपि न ज्ञायेत, स्वात्मन्यपि वा सोऽर्थो न व्यवस्थाप्येत अन्तरेण संवित्प्रकाशप्रसादं तद्व्यवस्थाया अनुपपत्तेरिति सर्वव्यवहार उच्छिद्येत । वेद्यधर्मत्वेऽपि प्रकाशस्य प्रमातृधर्मत्वं दुरुपपादं समर्थयितुं बीजाङ्कुरवत्प्रमातुरर्थरूपप्रकाशस्य कारणत्वे लब्धार्थकाप्रकाशतायां तदनपेक्षणात् प्रमातृलग्नता नोपपत्त्या घटते । तस्मात्प्राग्वद् दोषः प्रसज्येत । अर्थाद्भिन्नस्य प्रकाशस्य तत्सम्बन्धिता च कथं युज्येत स स्वयमप्रकाशात्मतया अप्राप्तस्वात्मलाभः कथं परं संबध्नीयात् सर्वथार्थतत्संविदोर्भिन्नतायां मुक्तदोषप्रसक्तेः । तस्मादिदं सिध्यति यद्घटादेः स्वरूपं संविदभिन्नत्वमिति । अतो विश्वमिदं भावजातं संवित्प्रकाशलग्नमेव तदनधिकवृत्ति अवभासते । मायाप्रमातुः करणानुग्राहकोऽर्कादिप्रकाशोऽपि जडभावराशिसादृश्यात् पृथग्भातुं नालं संविदमवलम्ब्यैव तत्प्रकाशनात् । सर्वव्यापकत्वान्न केवलं भावमेवावभासन्ती संविद्यावत्सदा असंभाव्यमानसत्ताकस्य खपुष्पादेरभावस्यापि जीवितप्रदत्वाद्विषयतां विधत्ते इत्याशयेनोक्तं 'अर्केन्दित्यादि' । ततश्च संविदात्मकचित्प्रकाशमाश्रित्यैव भासमानं तदर्कादि चित्प्रकाशात्मकं न ततो मनाङमात्रं भिद्यते । कथं तर्हि ग्राह्यग्राहकात्मा व्यवहार इत्यत आह - येयं चिदात्मनो मायाशक्तया परस्परं वेद्या वेदकाश्च, वेदकाच्चान्यन्यं

वेद्याश्च इयन्तोऽसंख्या विभेदिताः तद्भावाख्यो, स संवृतिसत्यतया व्यवहार एव मायाप्रमात्रपेक्षया भेदैकप्राणो भासते । अविच्छिन्नप्रमातुः पुनः सर्वं स्वात्मकल्पतया महामन्त्रात्मकमेव चकास्तीति भावः ॥१॥

नतु तावदमी विश्वे भावाः संविदि विश्रान्ता भवन्तु कथं तदैकात्म्यं ते समापद्येरन्, कुतश्च व्यतिरिक्ततया भासमानाः संविदं न भेदयेयुरपि इत्याशंक्याह—

ज्ञानाद्विभिन्नो नहि कश्चिदर्थ—
स्तत्तत्कृतः संविदि नास्ति भेदः ।
स्वयं प्रकाशाच्छतमैकधाम्नि
प्रातिस्विकी नापि विभेदिता स्याम् ॥२॥

यतोऽर्थाः संविद्विश्रान्ता एव प्रकाशन्ते ततस्ते संविदो न विभिद्यन्ते, तेषां प्रकाशमानत्त्वमेव संविदभिन्नत्त्वं, संविदेव प्रकाशः संविन्माहात्म्यादेव मायीयप्रमातृभावकल्पनोन्मीलनायां भावाः संवित्प्रकाशादतिरिक्ता इव प्रकाशन्ते च, प्रकाशमानाश्च ते अनुज्झितसंवित्तादात्म्या अपि विच्छिन्नतया बहिरपि भान्ति । तस्मात्संवित्प्रकाशानतिरिक्तवृत्तय इति सिद्धम् । त्यक्तसंविदैकात्म्या हि प्रकाशाद्भिद्यमाना अप्रकाशतामापन्ना न कदाचिद् भासेरन् इति लोकव्यवहारः सर्वः क्रयविक्रयाद्यात्मा विनश्येत् । नच तथा, अतः प्रकाश एव स्वातन्त्र्येण तथातथा भाववैचित्र्येण प्रकाशते इत्याशयत उक्तम्—'ज्ञानाद्विभिन्नो नहि कश्चिदर्थः

इति । नन्वेवं तथापि वेद्याः स्वमहिम्ना संविदं विभिन्दन्तु घटसंविदसौ पटसंविदियमित्यादिनेत्याशंक्याह– 'तत्तदिति, नच भावैः क्रियमाणः संविदि भेद उपपद्यते, भावा हि संविदो भिन्नत्वेनाप्रकाशमानाः स्वसत्तां नोपलभेरन् । कथं पुनः स्वजीवितस्थानीयां संविदं विभेत्तुमुद्युञ्जीरन्, अतस्ते संविदैकात्म्यभाजस्तदन्तर्मग्ना एव । यदि स्वात्मनि भिद्यमानत्वं सहेरन् तत्संविद्भेदिनः संभाव्येरन् । ते तु तत्कर्तुमसमर्था एव । अथ भावानां स्वसंवेदनेन क्रियमाणे भेदेऽभ्युपगम्यमाने स्फुटमन्योन्याश्रयदोषापातः । यावतः परस्परं भावतत्संवेदनयोर्वैचित्र्येण अवस्थित्यभावात् । मूर्तिक्रियावैचित्र्येणोद्भासितौ देशकालावपि वेद्यान्तर्गतौ प्रकाशैकात्म्यमुखप्रेक्षित्वात् कथंकारं प्रकाशं विभिन्ताम् । सर्वं भावजातं प्रकाशाभिन्नं प्रकाशमानत्वात् । नहि तद्भिन्नस्याप्रकाशरूपस्य प्रकाशमानत्वं युक्तं विप्रतिषिद्धत्वादिति बहुशः प्रोक्तम्, अतो देशाद्युपाधिरपि चित्प्रकाशाभिन्नं भावजातं न जातुचिद्विभिन्द्यात् इति वेद्यवत्कालादिरपि न प्रकाशस्य भेदकृत् । ननु मा वेद्या विभिन्दन् संविदस्तु संविदन्तरात् तद्भवेदेव भेद इत्याशंक्याह– 'स्वयमिति' । अस्यां संविदि प्रतिवस्तु संविदन्तरेण कृता विभेदिता न भवेत्, यतः प्रकाशैकरूपा संवित् तस्या घटादिसंविदन्तरमवलंम्य भेदव्यवहारे संवृतिबुद्ध्या स्वीक्रियमाणेऽपि एकतस्त्राप्रकाशरूपत्वमापतेत् इत्यसंविद्रूपतया न किञ्चित् स्यात्, प्रकाशैकरूपतया अविभेदिनि तस्मिन्संविदेकमय-

त्वमेव, परिमितप्रमातृपदे तु मायाशक्तया केवलं भिन्नतया भासमानोऽयं स्वरूपभेदो भवन्नपि प्ररोहं न याति प्रकाशैकरूपत्वात् इति, तस्माद्विश्वं तावदिदं संविद्येव विश्रान्तम् । ननु यैयं संविन्मूर्धाभिषिक्ततया प्रधानीक्रियते सा शान्तत्रह्मवदौदासीन्यमवलम्बमाना कथं विश्वमाभासयेत् कथं च तद्विश्रान्तिस्थानं भवितुमर्हा इत्याशंक्य विशेषणद्वारेणापाकुर्वन्नाह-स्वयं प्रकाशेति, सा हि संवित्स्वयं प्रकाशा परप्रकाशमुखाधीनत्वाभावात् स्वप्रकाशा, स्वप्रकाशत्वमेवाजडत्वं यन्माहात्म्याद्वेद्यवर्गं प्रकाशैक्यतया भासयन्ती स्वानन्दरसचमत्कारपूर्णतामेति इत्यतः सा सविमर्शा, विमर्शवैधुर्ये तु जडत्वप्रसक्तेः स्वविश्रान्तिशून्या कथं परं विश्रामयितुं शक्नुयात् । अतः संविन्मयस्य परमेश्वरस्य विमर्श एव समवेतेच्छाशक्तिपर्यायो रुद्रचेत्रज्ञादीन् प्रमातृवर्गान् नीलसुखादिप्रमेयनिचयांश्चावभासयति तथा निर्भासितानपि तान् संविन्मये प्रकाश एव विश्रान्तान्करोतीत्यर्थः । नन्वेवं स प्रकाशो विश्वाधारत्वे सति विश्वस्माद्भिन्न एव कथं न भायादित्याशंक्याह—'अच्छतमेति' । अच्छाच्छतरयोर्दर्पणस्फटिकयोरच्छतमत्वं नास्ति यतो दर्पणस्यैकपार्श्वप्रतिबिम्बितस्य स्फटिकस्यापि सर्वतः संक्रान्तविम्बस्य स्वं रूपमपि पृथक प्रथते संवित्प्रकाशस्य तु एतदेवात्यन्तनैर्मल्यं यद्विश्वप्रतिबिम्बनिर्भासनेऽपि स्वाकारस्यानवभासनं नचैवमनवभासने प्रकाशतामुज्झेत् इत्याह—'एकधाम्नीति' । मुख्यप्रकाशायामित्यर्थः ।

प्रकाशतात्यागे हि तृणमात्रस्यापि अप्रकाशमानत्वमापतेदिति भावः एवं सर्वे भावाः स्वात्मनि प्रकाशातिरिक्ते असत्कल्पाः अतः संवित्प्रकाश एव स्वतन्त्रः स्वेच्छयैव स्वान्तःस्थितान् विश्वान् भावानुन्मील्य बहिर्भासितानपि तानन्तःस्थानेवाभासयन् तत्तदात्मत्वेन स्फुरतीत्यर्थः ॥२॥

ननु भावा इमे वैचित्र्येण भासमानाः कथमपह्नूयेरन्-यावता तथावभासमानानां शिव एवात्मा इत्युक्तिं कः प्रतीयात् भात्रा हि भेदाभासनेन व्याप्ताः प्रकाशन्ते। शिवात्मकत्वं तु तेषां तद्विरोधिनैकरूपत्वेन व्याप्तं भाति, तस्मादिमे भावायुगपदेकात्मानोऽनेकात्मानश्च कथमित्याशंक्याह—

इत्थं स्वसंविद्घन एक एव
शिवः स विश्वस्य परः प्रकाशः।
तत्रापि भात्येव विचित्रशक्तौ
ग्राह्यग्रहीतृप्रविभागभेदः ॥३॥

इत्थं प्रकाशघनैकरूपायां संविदि अभिन्नवेद्यराशिना असंभाव्यमानभेदात्मना प्रकारेण स्वसंविद्घनः शिव एवैको मुख्यः सदाशिवादेर्भूमिपर्यन्तस्य स्वात्मकल्पस्य विश्वस्य प्रकाशस्तत्स्वरूपभूतः स एव हि नीलादिकमर्थजातमत्यक्तनीलादिभावमपि प्रकाशयन् प्रकाशाभेदमयतां प्रापयति, नीलादयो हि अत्यक्तस्वभावा एव चेत्यमानाः सन्तः संविदभेदमया एव। एतदेव संविद्घनात्मनः शिवस्य शिवत्वं यद्वैश्वरूप्येणावभासमानत्वेऽपि प्रकाशस्वभावादप्रच्यावः विश्वस्फुरणस्य

संविन्मरीचिकल्पत्वात् चित्कचनमयत्वम् चिद्व्यतिरिक्तस्य अप्रकाशमयतया न कदाचिद्भानं संभवेत्, अत एव सैन्धवघनवदन्तर्बहिः पूर्णतया एकैव संविदानन्दातिशयेनोच्छलन्ती विश्वं विस्फुरतीत्यर्थः । नन्वेवं शिवैकात्मत्वेऽपि कथमनेकात्मतया विश्वाभास इत्याशंक्याह—'तत्रापीति' । संवित्प्रकाशैकात्मत्वावभासेऽपि परमेश्वरस्य मुख्यां स्वस्वातन्त्र्यशक्तिमवलम्ब्य निमितीकृत्य च मन्त्रमहेश्वरादिप्रमात्रपेक्षया तदुचितप्रमेयभेदप्रमेदो विचित्रो भात्येव नच न भातीत्यर्थः । तस्यामेव मुख्यशक्तौ शक्त्यन्तराणामसंख्यानामन्तर्भावः । एतदेव स्वाच्छन्द्यं भगवतो यत्संविद्घनात्मक एव भवन् ग्रहीतृग्राह्यात्मना विविधरूपेण संविद्रूपादनतिरिक्तेनापि तदतिरिक्ततया भासमानेन वपुषा प्रकाशते विमृशते चेति सहृदयसंचेत्यमिदम् मन्त्रमहेश्वरादीनां प्रमेयभेदः श्रीतन्त्रा लोकादिषु निर्णीतस्तत एव विवेच्यः, विस्तरभिया नेह वितन्यते । तदेवं युगयद्भावानामनेकधा भासमानानामेकात्मत्वमनेकात्मत्वं चान्तर्बहिः स्वातन्त्र्यशक्तिवशाद्घटते । तथा वैचित्र्याभासेऽपि पूर्णाहमकृत्रिमपरामर्शचमत्कारसारतया अभेदभूम्यवलम्बनं विजृम्भमानमेवेति ॥३॥

ननु विश्वमिदमीश्वरेच्छयैव यदि बहिरवभास्यते तदानीमेव स्वात्मन्येव भास्यत इति विरुद्धमेतदुपलक्ष्यते, तथा हि स्वात्मनाविभेदेन भासमानस्यार्थस्य बहिर्निभासनं विरुध्यते नहि कश्चिदर्थोऽन्तर्भासमानस्तदानीमेव बहिर्भूतश्च भासि-

तुमुपपद्यते घट इव गृहान्तर्भूतश्चेति किमेतदित्याशंक्याह–

भेदः स चायं न ततो विभिन्नः
स्वच्छन्दसुस्वच्छतमैकधाम्नः ।
प्रासादहस्त्यश्वपयोदसिन्धु–
गिर्यादियद्वन्मणिदर्पणादेः ॥४॥

सोऽयं प्रमातृप्रमेयादीनां भेदोपभेदवैचित्र्योन्मीलनात्मा भेदोऽपि ततो बोधात्मनो भैरवस्वरूपोद्विभिन्नो नास्ति, भेदप्रकाशनमपि संविदन्तःस्थितमेव बहिरपि तत्स्वातन्त्र्याद् घटते मनागपि ततो भिन्नत्वेन परित्यक्तसंविदभेदं न स्फुरितुमुत्सहते । ननु भासते च विश्वमिदं संविदेकात्मकं चेति कथं संगच्छतामित्याशंकापासनाय विशिनष्टि– 'स्वच्छन्देति' । इदमेव स्वाच्छन्द्यमप्रतिहतेच्छत्वं यद्भिन्नतया भासमानत्वेऽपि वस्तुतोऽभेदात्मना स्वात्मनोऽनधिकवृत्त्या निर्भासनम् । सेयं भगवतः पराशक्तिर्यया प्रकाशपरमार्था निखिला भावाः पूर्णाहंविमर्शसारतया संविन्मयस्वात्मरूपा आभासन्ते । नन्वेवं स्वात्मानधिकवृत्त्या भान्तोऽपि भावाः कथमाधिक्येनेव प्रकाशन्त इत्यत आह– 'सुस्वच्छतमेति' । अत्यन्तनिर्मलादित्यर्थः । तत एवानधिकमपि विश्वमधिकमिव भाति सुस्वच्छतमत्वस्यैवेदं माहात्म्यं, वस्तुतो विश्वं नाम न किञ्चिद्भिन्नं वस्तु, न कदाचित्सृष्टं सृज्यते

संह्रियते वा केवलं स्वैश्वर्यातिशयतः शिव एव तथा तथाऽऽभासपरमार्थेन स्वेच्छोद्भासितवेद्यवर्गेण परितो विजृम्भमाणः स्वात्मानमानन्दरसनिर्भरं रसयतीति भावः, तथा 'एक धाम्न इति' सर्वविश्रान्तिस्थानत्वादनुपचरितप्रतिष्ठात्मन इत्यर्थः । एतदेव दृष्टान्तद्वारा हृदयङ्गमीकरोति यथा मणिदर्पणादेः स्वच्छवस्तुनः सकाशात्प्रसादादयस्तद्गताश्च अवयवावयवविभावाधाराधेयभावप्रभृतयः सर्वे व्यवहारा विचित्रा मनाङ्मात्रमपि ततो न भिन्ना अविद्यमानप्रातिस्विकस्वरूपाधिक्या अपि परस्परस्वरूपवैचित्र्यवैवित्र्येण तदधिकेनेवाभासन्ते इति । स्वच्छत्वमेतदेव दर्पणादेर्यत् भिन्नदेशकालाद्युपहितं ग्रामनदीपर्वतादिकं बिम्बाभिमत स्वात्मनि प्रतिबिम्बितत्वेऽपि स्वरूपमतिरोधाय तथात्वेन दर्शयितुं योग्यतया प्रतिबिम्बग्रहणसहिष्णुत्वमिति ॥४॥

ननु दर्पणादेः प्रतिबिम्बावभासित्वे व्यतिरिक्तस्य प्राक्सिद्धस्य बिम्बस्यापेक्षा अवश्यंभाविनी, विना बिम्बं प्रतिबिम्बं दर्शयितुमसमर्थत्वादेवं चिदात्मापि स्वस्मिन् प्रतिबिम्बरूपं विश्वमाभासयन् नूनं स्वस्माद्भिन्नमेव प्रतिबिम्बार्पकं बिम्बमपेक्षेतेति, कतमत्तद्बिम्बं प्राग्लब्धसत्ताकं प्रमाणसिद्धं स्यादिशंक्याह—

आदर्शकुड्यौ प्रतिबिम्बकारि
समर्पकं स्याद्यदि मानसिद्धम् ।

सुस्वच्छसंविन्मुकुरान्तराले
भावेषु हेत्वन्तरमस्ति नान्यत् ॥५॥

यदि प्रत्यक्षादिना प्रमाणेन निर्मले दर्पणेऽन्तः-हस्त्यश्वपुरुषनदीनगरादीनां प्रतिफलिताभासानां प्रतिबिम्बकरणहेतुः बाह्यं वस्तु समर्पकं प्रति बिम्बं ददत् बिम्बं सर्वत्र सर्वैः प्रमातृभिः परिदृश्यते, तथापि अत्यन्तनिर्मले संविद्दर्पणमध्ये विमर्शस्वातन्त्र्ययोगिनि भावेषु प्रतिबिम्ब्यायमानेषु नास्ति पृथङ्निमित्तान्तरं प्रतिबिम्बार्पकं कारणं यद्वशाज्जगन्निर्मास्येत। विनैव बिम्बादिहेत्वन्तरं स्वविमर्शबलयोगात् स्वच्छन्दः संविन्मयो भगवान् स्वात्मन्येव स्वेच्छयैव विश्वमुन्मीलयतीति रहस्यार्थः। ननु द्वैतनय इव परमाणुकर्मादि जगदुत्पादे भिन्ननिमित्तादिकमन्वेष्यम्। शान्तब्रह्मवादिवन्मलमायादि परिकल्प्यम्, एतदेव संविन्मुकुरस्य जडबाह्यदर्पणाद्वैलक्षण्यमजडत्वापोदकं स्वाच्छ्यं नाम यत् तथातथा भासमानमात्मानं विमृशन्नेवातिरिक्तत्वानुभयात्मनापि स्वयपुषा सर्वदा भात्येव, दर्पणस्तु तथात्वविमर्शशून्यत्वाज्जड एवेत्यतः प्रथमानमपि जगन्न बहिः सृष्टमन्तःस्थमेव चिद्धृदयायमानं सारं पूर्णतामावहतीति भावः ॥५॥

ननु परमेश्वरस्य स्वात्मन्यभेदेनान्तःस्थितं वेद्यवेदकभावजातं बहिर्विसृष्टमवभासयितुं च किमितोच्छा जायते, चेत् जायते किं सप्रयोजनं निष्प्रयोजनं वा। नाद्यः

नित्यतृप्तस्य निराकांक्षत्वात्, द्वितीयें पुनरिच्छोत्पादाभ्युपगमे सदैव बहिर्जगदवभासनं स्यात् न कदाचिद्वा तत्रापि विवर्तादिरूपं विश्वं प्रतिभासेतेत्याशंक्याह—

संविद्घनस्तेन परस्त्वमेव
त्वय्येव विश्वानि चकासति द्राक् ।
स्फुरन्ति च त्वन्महसः प्रभावात्
त्वमेव चैषां परमेश कर्ता ॥६॥

तेन सविमर्शतालक्षणेन हेतुना हे परमेश ! त्वमेवान्तर्बहिः स्वात्ममयेन विश्वेन परः पूर्णः संविद्घनः असंविद्रूपस्य ब्रतिरिक्तस्याभावादित्यतस्त्वत्तो बहिर्न किञ्चिद्विसृज्यते दृष्टप्रत्ययोऽयं यत्स्वप्नसंकल्पनिर्माणादौ स्वसंविद एव निरतिशयैश्वर्यवशादुपादानादिसामग्र्यपेक्षाविहीनमेव तत्तदपरिमेयानां अन्तर्व्यवस्थितभावराशीनां बहिष्क्रियायां विजृम्भमाणायामनतिरेकितयावलोकनमिति न किमपि स्वतन्त्रे भगवति अप्रत्ये प्रत्युत स्वानुभवबाह्यस्य कल्पनमेवाविश्वास्यमिति सहृदयवेद्यम् । स्वतन्त्रत्वादेव निष्कारणं जगत्सिसृक्षायां नित्यप्रवृत्तो महेश्वरः सदैव पञ्चकृत्यकरणशीलः, तस्याप्रतिहतेच्छस्य स्वाच्छन्द्यं न केनापि निरोद्धुं शक्यं प्रतिक्षेप्तुं वा ; स स्वेच्छयैव स्वरूपगोपनात्मिकां क्रीडामुल्लिलासयिषुः संविन्मयानेव वेद्यवेदकात्मभावराशीन् प्रति कृत्यानि करोति । मायाप्रमातृभावग्रहणेनापि जगन्नाट्यावभासनकारी

पुनरपि निष्कारणमेव स्वात्मानं स्वशाक्तवीर्यप्रथनेन विगतबन्धनं विधत्ते । नच बन्धने मायाद्यावरणं निमित्तं कल्प्यम्, तदावरणे तस्य स्वनाशापत्तेः । स्वशक्तिविकासाख्ये बन्धनध्वंसेऽपि शक्तिपातं विना अन्यस्य वैराग्यादेः कारणान्तरस्य अनवस्थापातादिदोषादित्यतः पञ्चानां कृत्यानामुपलक्षणं तावत्सृष्टिस्थिती आह—'विश्वानि चकासतीति' । त्वय्येव संविद्धने विश्वानि रूपाद्यात्मकानि जगन्ति द्रागक्रममेव चकासति तवैव ज्ञानक्रियात्मनो महसः प्रभावादैश्वर्यात् स्फुरन्ति च, चकारात् त्वय्येव लीयन्ते अर्थात्संविद एवोदेत्य तत्रैव प्रतिबिम्बितं तदभिन्नप्रकाशात्मकं विश्वं स्वात्ममयमेवेत्यर्थः । अत एवैषां जगतां त्वमेव कर्ता, एतदेव कर्तृत्वं यदलौकिककार्यकारणभावेन उपादानादिकारणं विना विश्ववैचित्र्यावभासनं, तदन्येषां नियतिशक्तिनियन्त्रितानां मायातत्त्वावस्थितानां ब्रह्मविष्ण्वादीनां नियतस्वस्वकृत्यानामसंभाव्यमेव । अत एव जगत्सर्जने मायाप्रकृत्यादेः कारणाभिमतस्य चित्स्वरूपाद् भेदाभेदविकल्पैरुपहतत्वात् कारणत्वं नोपपद्यते अतो विवर्तादिमयं जगन्न भवेत् । यदाहुराचार्याभिनवगुप्तपादाः—'विवर्तो ह्यसत्यरूपनिर्भासात्मा' इत्युक्तं, निर्भासते चासत्यं चेति कथं इति तु न चिन्तितम् । परिणामे तु रूपान्तरं तिरोभवति

रूपान्तरं च प्रादुर्भवति इत्युक्तम् । प्रकाशस्य तु रूपान्तराभावात् तत्तिरोधाने स्यादान्ध्यम् अप्रकाशश्च प्रादुर्भवन्नैव प्रकाशेत इत्युभयथापि सुप्तं जगत्स्यादिति न पर्यालोचितम् । प्रतिबिम्बवादे च स्वच्छतामात्रं संवेदनस्य न स्वातन्त्र्यमिति तत्समर्पकत्वस्त्वन्तरपर्येषणा कर्त्तव्या । अविद्या चानिर्वाच्या वैचित्र्यं चाधत्ते इति व्याहृतम् । पारमेश्वरी शक्तिरेवेयमिति तु हृदयावर्जकः क्रमः । तस्मादनपह्नवीयः प्रकाशविमर्शात्मा संवित्स्वभावः परमशिवो भगवान् स्वातन्त्र्यादेव रुद्रादिस्थावरान्तप्रमातृरूपतया नीलसुखादि प्रमेयरूपतया च अनतिरिक्तयाप्यतिरिक्तयेव स्वरूपानाच्छादिकया संविद्रूपानान्तरीयकस्वातन्त्र्यमहिम्ना प्रकाशते इत्ययं स्वातन्त्र्यवादः प्रीन्मीलित इति ॥६॥

एवमुक्तरूपमेव स्वात्मानं मायाप्रमातृताग्रह्मीभावेन समुत्कर्षयन्नुपसंहरति —

इत्थं स्वसंवेदनमादिसिद्ध-
मसाध्यमात्मानमनीशमीशम् ।
स्वशक्तिसंपूर्णमदेशकालं
नित्यं विभुं भैरवनाथमीडे ॥७॥

इत्थमुक्तप्रकारं स्वमात्मानं स्वसंवेदनं स्वप्रकाशमीडे तत्प्रवणतया देहादिप्रमातृताभिमाननिमज्जनेन

उन्मग्नसंविद्घनस्वरूपे समाविशामीत्यर्थः । ननु एतादृगात्मा केन प्रमाणेन ज्ञातुं शक्य इत्याशंक्याह– 'आदिसिद्धमिति' । सर्वेषां प्रमाणानां जीवितकल्पत्वान्न तत्र पूर्वसिद्धे परमेश्वरे प्रमाणोपयोगः । नच तार्किकोदय ईश्वरसिद्धिं कुर्वन्तोऽपि साधयितुं शक्नुयुः, नित्यानवच्छिन्नप्रकाशस्वभावे तत्र उत्पादज्ञप्तिव्यापारानुपपत्तेः । प्रमातापि देहादिः स्वयं जडः कथमजडं प्रतिष्ठापयेत् । संवित्मात्रोऽपि स्वातन्त्र्यवैकल्याज्जडपक्ष्य एव । नचेश्वरं निषेद्धुं कश्चिच्छक्नुयात् निषेद्धुरपि स्वयं तत्स्वभावत्वात् प्रत्युत स्वाभावं व्याहरतः स्ववचनविरुद्धं स्वसत्त्वमेव ज्ञाप्येत इत्याशयतोऽसाध्यमित्युक्तम् । ननु प्रसिद्धा एव ब्रह्माद्या ईश्वराः कथमप्रसिद्धमीश्वरमाश्रयेत्याशंक्याह– 'अनीशमिति' ईश्वरान्तरानधीनमत एव ईशं स्वतन्त्रं ज्ञातृकर्तृत्वैश्वर्यशालिनम् । ब्रह्माद्यास्त्वधरभूमिस्थास्तदीयैश्वर्यकणैरीश्वरीभूताः अस्वतन्त्रा एवेत्यर्थः । 'आत्मानमिति' ननु परं स्वया समवेतया विश्वशक्तिक्रोडीकारिण्या मुख्यया स्वातन्त्र्यशक्त्या संपूर्णं अत एव देशकालयोस्तन्निर्भासितयोरपि प्रागुक्तयुक्त्या संवित्प्रकाशाधीनजीवितत्वात् संविदं विभेत्तुमशक्नुवत्वात् तत्कलनाविहीनमत एव 'नित्यं' । कालकलनारहितत्वाद् देशाद्यपरिच्छिन्नत्वेन 'विभुं' । भरणरवणवमनस्वभावत्वात्

Indira Gandhi National

भैरवरूपं नाथं स्वाभिनं विश्वभरितपूर्णाहन्ताचमत्कारशालिनं शिवस्वरूपमित्यर्थः । एवमस्य प्रकरणस्य तात्पर्यार्थः, यस्मात्संविद्घनात्स्वात्मन इदं विश्वमुदेति तत्र विश्रान्तं प्रतिबिम्बकल्पतया यदिच्छयैवावभासते । यश्च तस्य प्रकाशमानस्यात्मा तेनानावृतो यत् स्वातन्त्र्याद्यत्र चानधिकत्वेऽप्यधिकमिवेदं भाति स एव परमार्थस्वभावोऽनुत्तरप्रकाशात्मा शिवोऽहमस्मि पूर्ण इति एवं शांभवोपायेन सहृदयाश्चिन्वन्तु स्वात्मानमिति ॥७॥

एवमुक्तप्रकारायाः परमार्थचर्चाया अनवरतपरामर्शनेन परशक्त्यनुगृहीताः स्वात्मपरमार्थमयीं त्रिजगतीं पश्यन्तो भैरवाग्नि नित्यसमाविष्टाः स्युरित्यव्यवहितां सद्यः फलप्राप्तिं स्वसंविदितामावेदयन्नाह—

सद्वृत्तसप्तकमिदं गलितान्यचिन्ताः
सम्यक्स्मरन्ति हृदये परमार्थकामाः ।
ते भैरवीयपरधाम मुहुर्विशन्ति
जानन्ति च त्रिजगतीं परमार्थचर्चाम् ॥९॥

स्पष्टम् ॥९॥

इति श्रीमहामाहेश्वर-श्रीमदाचार्याभिनवगुप्तपाद-विरचितायाः परमार्थचर्यायाः पं० हरभट्टशास्त्रिकृतं विवरणं समाप्तम् ॥

श्रीमताभिनवेनेमां रचितां पारमार्थिकीम् ।
चर्चां स्वात्मसमावेशदायिनीं व्यवृणोद्धरः ॥

श्रीशिवार्पणमस्तु ॥

SAN
294.5
GUP-



IGNCA RAR
R-407
ACC. No.

Indira Gandhi National
Centre for the Arts